॥ श्रीः ॥

व्रजजीवन प्राच्यभारती ग्रन्थमाला
७४

# बृहद्धातुकुसुमाकरः

( टिप्पण्यादिविभूषित-ण्यन्त-सन्नन्त-यङन्त-यङ्लुङन्त-भावकर्म-कृदन्तरूपसहितसार्थसकलधातुरूपाणां सङ्ग्रहः )

सङ्ग्रहकारः सम्पादकश्च
पं. हरेकान्त मिश्रः
साहित्याचार्यः, व्याकरणशास्त्री

चौखम्बा संस्कृत प्रतिष्ठान
दिल्ली

# पूर्वपीठिका

**'भूवादयो धातवः'** (१।३।१)—क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः। धातवो दशगणतया विभज्यन्ते। ते च—(१) भ्वादयः शब्विकरणाः। (२) अदादयो लुग्विकरणाः। (३) जुहोत्यादयः श्लुविकरणाः। (४) दिवादयः श्यन्विकरणाः। (५) स्वादयः श्नुविकरणाः। (६) तुदादयः शविकरणाः। (७) रुदादयः श्नम्विकरणाः। (८) तनादयः उविकरणाः। (९) क्र्यादयः श्नाविकरणाः। (१०) चुरादयः स्वार्थिकणिज्विकरणा इति।

प्रायः सर्वेभ्यो धातुभ्यो दश लकारा भवन्ति। लट्। लिट्। लुट्। लृट्। लेट्। लोट्। लङ्। लिङ्। लुङ्। लृङ्। इति दश लकाराः। एषु पञ्चमो लकारश्छन्दो-मात्रगोचरः। अतोऽत्र स न प्रदर्श्यते। विध्याशीर्भेदेन लिङ् द्विविधः। तथा च लोकेऽपि दश लकाराः।

**'लः कर्मणि च भावे चाकर्मकेभ्यः'** (३।४।६९)—लकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च लडादीनां लकारा इति प्राचां संज्ञाः। ताभिरिहापि व्यवहारः।

**'तिप् तस् झि, सिप् थस् थ, मिब्वस् मस्, ताताांझ, थासाथांध्वम्, इड्वहिमहिङ्'** (३।४।७८)— एतेऽष्टादश लादेशाः स्युः। एतेषां 'तिङ्' इति प्रत्याहारलब्धा संज्ञा।

**'तङानावात्मनेपदम्'** (१।४।१००)—तङ्प्रत्याहारभूताः त आतां झ, थास् आथाम् ध्वम्, इट् वहि महिङ् इति द्वितीयास्त्रयस्त्रिका लादेशाः प्रत्ययाः, शानच्-कानचौ च आत्मनेपदसंज्ञा स्युः।

**'लः परस्मैपदम्'** (१।४।९९)—आत्मनेपदभिन्नाः तिप् तस् झि, सिप् थस् थ, मिप् वस् मस् इति प्रथमे त्रयस्त्रिका लादेशाः परस्मैपदसंज्ञाः स्युः।

**'अनुदात्तङित आत्मनेपदम्'** (१।३।१२)—अनुदात्तेत उपदेशे यो ङित् तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदप्रत्ययाः स्युः। 'एध् वृद्धौ' अनुदात्तेत्। 'डीङ् विहायसा गतौ' ङित्।

**'स्वरितञितः कर्त्रभिप्राये क्रियाफले'** (१।३।७२)—स्वरितेतो ञितश्च धातोरात्मनेपदप्रत्ययाः स्युः क्रियाफले कर्तृगामिनि सति। अन्यगामिनि तु परस्मैपदप्रत्यया इत्यर्थः। 'डुपचष् पाके' स्वरितेत्। 'वेञ् तन्तुसन्ताने' ञित्। इत्यादय उभयपदिनः।

**'शेषात् कर्तरि परस्मैपदम्'** (१ ।३ ।७८)—आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात्।

**'तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः'** (१ ।४ ।१०१)—तिङ उभयोः पदयोः त्रयस्त्रिकाः क्रमात् प्रथमपुरुषमध्यमपुरुषोत्तमपुरुषसंज्ञाः स्युः।

**'तान्येकवचनद्विवचनबहुवचनान्येकशः'** (१ ।४ ।१०२)—लब्ध-प्रथमपुरुषादिसंज्ञानि तिङस्त्रीणि त्रीणि वचनानि प्रत्येकमेकवचनादिसंज्ञानि स्युः।

**'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः'** (१ ।४ ।१०५)—तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमपुरुषः स्यात्। त्वं भवसि। भवसि इत्येव वा।

**'अस्मद्युत्तमः'** (१ ।४ ।१०७)—तथाभूतेऽस्मदि उत्तमपुरुषः स्यात्। अहं भवामि। भवामि इत्येव वा।

**'शेषे प्रथमः'** (१ ।४ ।१०८)—मध्यमोत्तमयोरविषये प्रथमपुरुषः स्यात्। स भवति। केवलं भवति इति वा।

**'तिङ्शित् सार्वधातुकम्'** (३ ।४ ।११३)—तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः।

**'कर्तरि शप्'** (३ ।१ ।६८)—कर्त्रर्थे सार्वधातुके प्रत्यये परे धातुभ्यः शप् स्यात्। शपावितौ। 'अ' मात्रं शिष्यते।

**'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्'** (१ ।४ ।१३)—यः प्रत्ययो यस्मात्क्रियते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परेऽङ्गसंज्ञं स्यात्। भवामि भविष्यामि इत्यादौ केवलो धातुः, विकरणप्रत्ययविशिष्टा 'भव' इत्यादयश्च अङ्गसंज्ञाः स्युः।

**'सार्वधातुकार्धधातुकयोः'** (७ ।३ ।८४)—अनयोः परयोः इगन्ताङ्गस्य गुणः स्यात्। 'नी'—नयति। नेष्यति।

**'आर्धधातुकं शेषः'** (३ ।४ ।११४)—तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्ययः आर्धधातुकसंज्ञः स्यात्।

**'पुगन्तलघूपधस्य च'** (७ ।३ ।८६)—पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात् सार्वधातुकार्धधातुकयोः। 'बुध्'—बोधति। बोधिष्यति।

**'अलोऽन्त्यात्पूर्व उपधा'** (१ ।१ ।६५)—अन्त्याद् वर्णात् पूर्वो वर्णः उपधासंज्ञः स्यात्। 'बुध्' इत्यत्र उकार उपधा।

अत्र प्रथमं विकरणप्रत्ययार्हाश्चत्वारो लकाराः ततस्तदनर्हाः षट् इत्येवं क्रमेण दश लकाराः कथ्यन्ते।